पातालं कूर्मो रक्षतु आकाशं च सुदर्शनः ।
स नित्यं सर्वगात्रेषु प्रतिष्ठेद्विष्णुपञ्जरम् ॥
विष्णुपञ्जरविष्टोऽहं विचरामि महीतले ।
राजद्वारे पदे घोरे सङ्ग्रामे शत्रुसङ्कटे ॥
नदीषु कान्तारे चैव व्याघ्रे चैव भयावहे ।
डाकिनीभूतप्रेतेषु भयं नास्ति कदाचन ॥
अपुत्रो लभते पुत्रं धनहीनो धनं लभेत् ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं सदाऽश्नुते ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ॐ ॐ विष्णवे नमः। ॐ विष्णुपञ्जरं क्रोडानां पद्म उत्तरं सप्तलोचनद्रियद्रियं पद्मानां पद्म उत्तरं विष्णुक्रोडिदुर्गमय विष्णुमूर्त्तिभूतमय क्रोडानां पद्म उत्तरम्। ॐ श्रीविष्णवे नमः स्वाहा।

## विष्णुस्तवः।

ॐ नमोऽस्तु पुरुषोत्तमाय परमरिपुपरपुरहरण-पराक्रमाय परमबलभटोलटोललोलितगलितमहाबलाय च जाग्रत्सुप्ततूर्यचतुर्भुजाय नारायणाय नरसिंहवामनाय नारायणार्दनाय नरगदायुद्धे दानवान्तकरिपुमर्दनपाञ्च-जन्यसुदर्शनायुधाय दैत्यदानवयक्षराक्षसपिशाचभूतगण-धरधरणीधरधीरदराय च गन्धर्वमधुरगीतसुरविद्याधर-ऋषिप्रभृतिसेविताय च परमरिपुरावणार्जुकधेनुकप्रलम्ब-केशराविष्टकमेनिगजबलतुरगमिससृगालादिनिधनाय च पुरुषोऽनन्तसमुद्राश्रयः खगवरवरेन्द्रः श्रीप्रियो धनदप्रियो वैश्रवणाङ्कोऽस्मान् रक्षतु अस्मान् गोपयतु स्वाहा।

## शिवस्तवः।

ॐ नमः शिवाय शर्वाय देवदेवाय वै नमः।
रुद्राय भुवनेशाय शिवरूपाय वै नमः॥
त्वं शिवस्त्वं महादेव ईश्वरः परमेश्वरः।
ब्रह्मा विष्णुश्च रुद्रश्च पुरुषः प्रकृतिस्तथा॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

त्वं कालस्त्वं यमो मृत्युर्वरुणस्त्वं कुवेरकः ।
इन्द्रः सूर्यः शशाङ्कश्च ग्रहनक्षत्रतारकः ॥
पृथ्वी सलिलं त्वं हि त्वमग्निर्वायुरेव च ।
आकाशं त्वं परं शून्यं सकलं निष्कलं तथा ॥
असुराणां पतिस्त्वं हि देवानां त्वं पतिस्तथा ।
उमापतिः पशुपतिर्देवानां सदसःपतिः ॥
उमाङ्गे संस्थितो यश्च कर्त्ता हर्त्ता करोति यः ।
त्वमेव देवदेवेशः कर्म कृत्वा महाशिवः ॥
अभक्षभक्षणश्चैव सुरापानमदान्वितः ।
युवतीरतिसंयुक्तः सन्ध्याभ्रष्टे तु संयुतः ॥
एतानि सर्वकर्माणि यः करोति महाशिवः ।
अस्य हि ताण्डवं नृत्तं युद्धं च कमनं तथा ।
कफमेदयुतच्छुक्रं पुरीषमूत्रसंयुतम् ॥
एतानि सर्वकर्माणिः यः करोति महाशिवः ।
अशुचिर्वा शुचिर्वाऽपि सर्वकामगतोऽपि वा ।
चिन्तयेद्देवमीशानं स बाह्याभ्यन्तरः शुचिः ॥
नमस्ते देवदेवेश ईशान वरदाच्युत ।
मम सिद्धं भूयश्च स्वं सर्वकार्येषु शङ्कर ॥
नमस्ते देवदेवेश त्वत्प्रसादाद्ददाम्यहम् ।
वाक्ये हीनेऽतिरिक्ते वा मां क्षमस्व सुरोत्तम ॥
यस्तिष्ठन् व्याप्तविश्वस्तनुकरचरणैश्चक्षुसा यो नरेन्द्रै-
स्तिर्यग् मूर्त्या सभानामवनितलगतो मानुषाणां च संस्थः ।
जाग्रत्स्वप्नं सुषुप्तं शुभवहमभयं सर्वयोर्यं च तूर्यं
तूर्यं तं शून्यमेकं सततितिमिरतः प्रोच्यते ज्ञायते च ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# शिवस्तवः ।

ॐ शिवः कर्त्ता शिवो धाता शिवो दत्तवरप्रदः ।
शिवो रक्षतु मां नित्यं शिवाय च नमोस्तु ते ॥
शिवो भोक्ता शिवो भोग्यं दासकं च शिवात्मकम् ।
यजमानः शिवश्चापि मां रक्षतु नमोऽस्तुते ॥
शिवः सञ्जयरूपश्च शिष्यमूर्त्तिः शिवस्तथा ।
शिवो ज्ञानप्रदो नित्यं मां रक्षतु नमोऽस्तु ते ॥
शिवो ब्रह्मा शिवो विष्णुर्महादेवः शिवस्तथा ।
शिव इन्द्रो वरुणश्च मां रक्षतु नमोऽस्तु ते ॥
शिवो यमः कुवेरश्च शिवः सूर्यश्च चन्द्रमाः ।
अङ्गारकः शिवश्चापि मां रक्षतु नमोऽस्तु ते ॥
शिवो बुधो गुरुश्चैव शुक्रश्चापि शिवस्तथा ।
शनैश्चरः शिवश्चैव मां रक्षतु नमोऽस्तु ते ॥
राहुः केतुः शिवः प्रोक्तो नवग्रहशरीरकः ।
नवशक्तिसमायुक्तो मां रक्षतु नमोऽस्तु ते ॥
पूर्वदक्षिणसंज्ञेयाः पश्चिमोत्तरमध्यतः ।
अध ऊर्ध्वं शिवश्चापि मां रक्षतु नमोऽस्तु ते ॥
शिवोऽग्निर्नैर्ऋतिर्वायुरैशान्या शिवसंज्ञका ।
सत्यं धर्मः शिवश्चापि मां रक्षतु नमोऽस्तु ते ॥
कालो मृत्युस्तथा क्रोधो विश्वकर्मा हरिस्तथा ।
सर्वदेवं तु तत्सर्वं मां रक्षतु नमोऽस्तु ते ॥
चतुर्विंशवियत्त्वं च शिवाङ्गं च प्रधानकम् ।
पुरुषश्चामरो यगः कलाविद्या शिवस्तथा ॥

P. P. Ac. Gunratnasuri M.S.　　Jin Gun Aaradhak Trust

अष्टचिंशकपञ्चाशत्पञ्चचिंशकसंयुतम् ।
शिवाङ्गमिति तत्सर्वं मां रक्षतु नमोऽस्तु ते ॥
अष्टमूर्त्तिः शिवश्चापि अष्टपत्निः शिवस्तथा ।
सर्वः शिवगणश्चैव मां रक्षतु नमोऽस्तु ते ॥
भूतयक्षपिशाचका राक्षसाश्चापि दानवाः ।
नदीनदसम्भवाश्च गिरिजाश्च समुद्रजाः ॥
लतावृक्षसमुत्पन्ना निर्भरस्थलसम्भवाः ।
सर्वः शिवगणश्चैव मां रक्षतु नमोऽस्तु ते ॥
विषस्थानास्तु ये सर्वे सरीसृपपिपीलिकाः ।
सर्वः शिवगणश्चैव मां रक्षतु नमोऽस्तु ते ॥

ॐ ॐ कर्णद्वयं शिवरुद्रं एकस्तु सदाशिवः नमो नमः स्वाहा ।

# श्रीस्तवः ।

## श्रु

ॐ श्रीदेवी महावक्त्रा चतुर्वर्णा चतुर्भुजा ।
प्रज्ञावीर्यसारज्ञेया चिन्तामणिकुरुस्मृता ॥
श्रीदेवी सततं मूर्ध्ना त्वां च नमामि शक्तितः ।
दनिकस्तु महाभक्त्या त्रातुं अर मम स्तुतिम् ॥
श्रीशालिकान्तरूपा त्वं स्निग्धगात्रं च ताण्डुलम् ।
ददासि मे सदा चित्रं सौभाग्यं लोकपूजितम्[1] ॥
श्रीताण्डुली[2] महादेवी श्रीमल(त?)कमलशोभिता ।
ददासि मे महाभोग्यं सर्वद्रव्यहितं धनम् ॥

[1] Ślokas 2 and 3 missing in B. [2] श्रीचण्डुली .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

श्रीव्रीहिमुक्ताजीवा त्वं सर्वभूपनन्दनी ।
ददासि मे सुखं नित्यं जीवितं धातुकाञ्चनम्[1] ॥
श्रीधान्यराज्ञी[2] त्वं देवी प्राण[3]स्ताण्डुलसंज्ञकः ।
मही रत्नसभास्थिता[4] सर्वरत्नगुणान्विता ॥
ब्रह्मादिस्तम्भपर्यन्तं जगत् स्थावरजङ्गमम् ।
शिवाङ्गमिति तत्सर्वं मां रक्षतु नमोऽस्तु ते ॥
श्रीधनदेविका रम्या सर्वरूपवती तथा ।
सर्वज्ञानमणिश्चैव[5] श्रीश्रीदेवि नमोऽस्तु ते ।

ॐ ॐ श्रीब्रह्मात्माय नमः स्वाहा । ॐ हुं श्रीविष्णवन्तरात्मने नमः स्वाहा । ॐ मं श्रीईश्वरपरमात्मने नमः स्वाहा । ॐ चं श्रीमहादेवनिरात्मने नमः स्वाहा । ॐ श्रीबुद्धात्यात्मने नमः स्वाहा । ॐ श्रीधर्मनिष्कलात्मने नमः स्वाहा । ॐ श्रीसङ्घशून्यात्मने नमः स्वाहा ।

# भट्टारीसरस्वतीस्तुतिः ।

## श्रु

ॐ सरस्वति नमस्तुभ्यं वरदे कामरूपिणि ।
सिद्धिदर्द्धिं[6] करिष्यामि सिद्धिर्भवतु मे सदा ॥
प्रणम्य सर्वदेवांश्च परमात्मानमेव च ।
रूपसिद्धिप्रयुक्ता या[7] सरस्वती नमाम्यहम् ॥

---

[1] Śloka missing. [2] ददाभञ्च. [3] प्रज्ञस्. [4] मणिरत्नदनततं.
[5] सर्वज्ञकमितिदत्यं. [6] सिद्धारम्भं करचणि. [7] रूपसिद्धिकरी चभत्.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सुभागत्वेश्वरी देवी चतुर्भुजा चिलाञ्छना ।
सर्ववन्दनरक्षी त्वं अधुना ते सुकालकः ॥
सुलभा त्वां स्वरमन्त्रैरभेजं फलकं परम् ।
सर्वक्लेशविनाशनं सन्ति त्वं सङ्गतोत्मना ॥
अचिनीरसहस्राणां सर्वरोगविनाशनम् ।
तं मम सर्वं सिध्यतु सर्वकार्यप्रसिद्धये ॥

ॐ सं सरस्वति श्वेतवर्णायै नमः स्वाहा । ॐ बं सरस्वति रक्तवर्णायै नमः स्वाहा । ॐ तं सरस्वति पीतवर्णायै नमः स्वाहा । ॐ अं सरस्वति कृष्णवर्णायै नमः स्वाहा । ॐ इं सरस्वति विश्ववर्णायै नमः स्वाहा ।

After the first two ślokas, B goes on thus:

पद्मपत्रविमलाक्षि पद्मकेसरवर्णिनि ।
नित्यं पद्मालये देवि तुभ्यं नमः सरस्वति ॥
ब्रह्मपुत्रि महादेवि ब्रह्मण्ये ब्रह्मनन्दिनि ।
सरस्वति संज्ञायनि प्रयनय सरस्वति ॥
काव्यं व्याकरणं तर्कं वेदशास्त्रपुराणकम् ।
कल्पसिद्धीनि तन्त्राणि त्वत्प्रसादात् करोक्षभेत् ॥

# सर्वक्षमास्तुतिः ।

श्री

यत्कृतं किञ्चिन्मया मुमुनधिया मुनः ।
तत् क्षन्तव्यं त्वया नाथ यतस्तनोषि देहिनः ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अप्रत्यादिपरिज्ञानादशक्यवस्तुभावतः।
क्षपाकारिकमित्यस्तु सर्वंच सुखसाधनम्॥
धर्मधातोरधिष्ठानात् समयस्मरणादपि।
क्षताय सर्वसत्त्वार्थं कुरु त्वं सर्वसिद्धये॥

ॐ यथा भूर्भुवः स्वः स्वाहा। अं ॐ दशदिगन्तराल हुं फट्। ॐ भवेद्विवशरीरदद्रा रक्षसि मे धर्मा कुं कुमार क्षमासम्पूर्णाङ्गमनोहराय नमः स्वाहा।

## सर्वसिद्धिस्तुतिः[1]।

स्रू

श्रीमाररोग सत्त्वार्थ श्रीडडिबलिमण्डल।
पूर्वमोक्ष सर्वसिद्धि महाज्ञान नमोऽस्तु ते॥
श्रीगुरुपादम्पु तुहु श्रीआर्यगुरु म्पु शुद्ध।
मिचाणां महामोक्षणं इबलिन्न तमोऽस्तु ते॥
श्रीभदन्तगुणराशि श्रीआर्यगुरुमुत्तमम्।
शिष्यगणसुमयनं इतुङ्कुल नमोऽस्तु ते॥
श्रीप्रज्ञाधर्मपण्डिता आर्यगुरु महाफल।
बलविद्या महाधर्म इकम्बङ्गन् नमोऽस्तु ते॥
श्रीआर्यगुरुपादेन इङ् अग्निमहामण्डल।
सुतीक्ष्णबुद्धिसंसिद्धः नमो सिद्धि नमोऽस्तु ते॥

---

[1] A typical blending of Sanskrit and vernacular words in the shape of quasi-ślokas.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

श्रीनखरसम्बुद्धः पेगघशनपूजन
श्रीकेतुधररत्न त्वं कनिगर नमोऽस्तु ते ।
श्री आर्यबहुला भद्रा इमकु द्वादशमोक्षम् ॥
श्री आर्यगण्डित सूर्य कपुलुङ्गन् नमोऽस्तु ते ।
श्री आर्यगुरुसुमित्र चक्र पदश चतुर्थम् ॥
श्रीगुरुपादरि रागं पञ्चदशि नमोऽस्तु ते ।
श्री आर्यम्पु सुदर्शन्ती पङ्कज आत्ममण्डल ॥
श्री आर्यदेव शुद्धन पगुमूल नमोऽस्तु ते ।
श्री आर्यगुरु सि बुद्ध पङ्केतन महात्मनम् ॥
श्री आर्यगणगर्भं शितिलेबक्र नमोऽस्तु ते ।
श्री आर्यगुरुप्रदीप्त वज्रपुरमहाभिक्षु ॥
नरशिष्य महामन इमिगयु नमोऽस्तु ते ।
श्री आर्यगुरुदङ्गन्द्रा मुखवर्णदमण्डल ॥
श्री आर्यगुरुपादेन गुरुपाद नमोऽस्तु ते ।
सिरश्री आर्यहम्बन्तो देवशिष्य महाफल ॥
अन्तकदेवीजुतपुच महायान समतृष्णसमज्ञान ।
वज्रपण्डि नमोऽस्तु ते - - - - - - - - ॥
सिरश्री सद्धार्यवज्र गुरुपाद महाज्ञान ।
सिरश्री गगनवज्र ब्रह्मभिक्षु नमोऽस्तु ते ॥

# सूर्यस्तवः ।

ॐ रक्तवर्ण महातेजः श्वेतपद्मोपरिस्थित ।
सर्वलक्षणसम्पूर्ण सर्वाभरणभूषित ॥



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

द्विभुजं एकवक्त्रं च सौम्यपङ्कजधृत्करम् ।
वर्त्तुले तेजोबिम्बे तु मध्यस्थं रक्तवाससम् ॥
आदित्यस्य त्विदं रूपं शुचिसत्त्वजितेन्द्रियम् ।
त्रिकालं यः स्मरेत्केन्द एकचित्ते व्यवस्थितः ॥
सोऽचिराद्भवति लोके वित्तेन धनदोपमः ।
मुच्यते सर्वरोगैस्तु तेजस्वी बलवान् भवेत् ॥
हृदयास्था शिरश्चैव शिखापमास्त्रलोचनम् ।
रक्तवर्णास्त्विमे सौम्याः सर्वाभरणभूषिताः ॥
वरदपद्महस्तास्तु ध्यातव्याः साधकेन तु ।
विद्युत्पुञ्चिनिनं स्तोत्रं उग्रदंष्ट्रा कालिनीं ॥

## सूर्यस्तवः (द्वादशादित्यस्तवः) ।

स्रु

ॐ नमामि शिरसा सूर्यं सप्तलोकनमस्कृतम् ।
दीप्तमन्त्रं महावीर्यं ज्ञानवन्तं शिवात्मकम् ॥
वक्ष्येऽहं नामतः सम्यग्व्यासेन परमं शिवम् ।
मासे मासे यथोत्पन्नं तदेव शृणु मे पुनः ॥
अरुणो माघमासे च विवस्वान् फाल्गुने स्मृतः ।
चैत्रे मासे भवेदंशुर्भानुर्वैशाख एव च ॥
ज्यैष्ठे मासे भवेदिन्द्र आषाढे अर्यमा स्मृतः ।
भगस्तिः श्रावणे मासे यमो भाद्रपदे तथा ॥
पर्जन्यश्चाश्विने मासे कार्त्तिके च दिवाकरः ।
मार्गशिरे स्यान्मित्रश्च पौषे विष्णुः स्मृतस्तथा ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इत्येते द्वादशादित्या नामतः परिकीर्त्तिताः ।
मासेभ्यो द्वादशादिभ्यो नमस्कारं करोम्यहम् ॥
आदित्यस्तवनं दीप्तं यो नरः कथयिष्यति ।
त्रिकालमेककालं वा शिवभक्तिसमाश्रितः ॥
आदित्यस्तवनं प्रोक्तं यो नरः पठते सदा ।
यद्यत्प्रार्थयते सम्यक् सदाऽऽप्नोति स मानवः ॥
मोक्षार्थी लभते मोक्षं स्वर्गार्थी स्वर्गमाप्नुयात् ।
पुत्रार्थी पुत्रमाप्नोति भोगार्थी भोगमाप्नुते ॥
जयार्थी जयमाप्नोति यशोऽर्थी लभते यशः ।
बद्धो विमुच्यते बन्धाद्रोगी रोगात्प्रमुच्यते ॥

# सूर्यानन्दस्तुतिः ।

श्रु

सूर्यानन्दनमीश्वरममृतादिमहेश्वरं ऋषि कुकुविद्याक्षरं अक्षोभ्यबुद्धदेवं च नरसिंहब्रष्टदेवं सङ्गमविजयभैरवं कल्हरि ऋषि सयक रत्नसम्भवमहाबुद्धं बुद्धधर्मधर्मकं साबनीरमभैरवं सुखयज्ञो महर्षि अमिताभं महाबुद्धं तम्बो विष्णु अन्धकारं तिम्बुर महाभैरवं श्रीकेशवमहर्षि अमोघसिद्धिमहाबुद्धं शिवशून्यधर्मकं सदानिर्वाणभैरवं श्रीपिङ्गलमहर्षि वैरोचनमहाबुद्धम् ।

ॐ ॐ अक्षोभ्य सूर्यदेव महागङ्गायै नमः स्वाहा । ॐ ॐ रत्नसम्भव सूर्यदेवमहागङ्गायै नमः स्वाहा । ॐ

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ॐ अमोघसिद्धि सूर्यदेवमहागङ्गायै नमः स्वाहा । ॐ
ॐ वैरोचनसूर्यदेव महागङ्गायै नमः स्वाहा ।

इति सूर्यानन्दस्तुतिः । ध्रुवऋषिः ।

## सोमस्तवः ।

ॐ । चन्द्रमण्डल सम्पूर्ण चन्द्रोऽयं ते प्रशंस्यते ।
चन्द्राधिप परं ज्योतिर्नमश्चन्द्र नमोऽस्तु ते ॥
सिद्धिराग नमोऽस्तु ते दगोपतिपदनम् ।
बिसत्सत्यहारान्वित नमश्चन्द्र नमोऽस्तु ते ॥
कर्मशक्ति जगच्चक्षुः सर्वाभरणभूषित ।
श्वेतपञ्चकलारुण नमश्चन्द्र नमोऽस्तु ते ॥
कर्मदक्ष जगच्चक्षुः सर्वाभरणभूषित ।
श्वेतपञ्चकलारुण नमश्चन्द्र नमोऽस्तु ते ॥
कुमुदोत्पलहस्तं च शार्वरीदीपमङ्गलम् ।
धर्माधर्माशयं पश्यन् नमश्चन्द्र नमोऽस्तु ते ॥
लोकोऽयं ते प्रकाशितो लोकपूजा समर्पिता ।
- - - - - - - - - - नमश्चन्द्र नमोऽस्तु ते ॥
अष्टदीक्षारमे नित्यं अष्टदीपमसीकरम् ।
अष्टाहकलासम्पूर्ण नमश्चन्द्र नमोऽस्तु ते ॥
शिवलोकं चन्द्राधिपं[1] - - - - - - - ।

[1] This pāda probably to be shifted above, in the place of the missing pāda.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# स्मरस्तवः-सदम्पतिस्तवः।

ॐ अनङ्गतर्पिणी पत्नी पुष्पेषुमण्डिनी तथा।
काम दनोवती पत्नी मदनी मदनस्तथा॥
मनोभवः शोभनी च श्रीमती मकरध्वजः।
कन्दर्पः सोमवती च श्रीजयिनी च मन्मथः॥
कामदेवो रतिः पत्नी श्वेतरी स्मर एव च।
अतनुर्दनारिपत्नी मनसिजश्च तारिणी॥
ॐ कामदेवं पीतवर्णं गुरुद्वयं स्थिरकस्थम्।
शुक्लाधिपतीशानं संघराजोपहोत्तमम्॥
आकाशं नात्मकं देवं बिन्दुनादात्मकात्मकम्।
सर्वपापप्रहरणं सर्वकार्यप्रदायकम्॥
मोक्षप्रदं प्रकाम्यं च निःसन्देहं निरिश्चैव।
निर्योगो निर्वियोगश्च सर्वदेशे विततस्त्वम्॥
प्रत्यक्षस्त्वमिह लोके मानुषस्त्वं च देवस्त्वम्।
सूक्ष्मस्त्वं सकलस्त्वं च आत्मा त्वं च शरीरं त्वम्॥
एकरूपं चाविशेषं हृद्देवीसुखसाधनम्।
चन्द्रवत्सततमेकं त्रैलोक्यविजयः शक्तिः॥
ईश्वरवरदेवश्च ब्रह्मजयश्च विजयः।
महादेववरस्त्वं च विष्णुविजय एव च॥
इन्द्रराजा च जयस्त्वं सर्वदेवसेवितस्त्वम्।
त्रैलोक्यसेवितस्तथा - - - - - - - - - ॥
चिन्तामणिमहेन्द्रश्च सर्वकुमारराजा त्वम्।
सर्वदेवीसेवितस्त्वम् - - - - - - - - - ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सुमन्त्रिसंज्ञादिश्चैव इष्टकामश्च याजकम् ।
अष्टतन्वधिपतिश्च उग्रदेवश्च संज्ञानम् ॥
सर्वपापं हरेत्सिद्धि हे देव कुमारराज ।
सर्वरोगप्रहरणं सर्वशत्रुविनाशनम् ॥

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# Sanskrit Texts from Bali

## III.

## Buddhaveda.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# बुद्धवेदः ।

इन्द्रशून्यमहामृतं गुरुशून्यमहामृतम् ।
पविचमहामृतं च स्मर महाशुचि निङ्वे ॥
निर्मले निर्बुद शून्य वरद महापविच ।
निशितिमहापद्माय सूक्ष्मतय महामृतम् ॥
सप्तशून्य महासूक्ष्म पविचं महानुक्षणम् ।
सर्वभुक्तिमहामृतं सूक्ष्मामृतं महा इनम् ॥
निर्विघ्नं निर्मलं शून्यं सर्वपापमोक्षंकरम् ।
निःस्वरं शून्यधर्मं च सूक्ष्ममूर्त्तिमहामृतम् ॥
शून्य निर्मलानुक्षणं सप्तयोगमोक्षंकरम् ।
अनुक्ष सर्वकान्ताय एकस्थान महाशून्य ॥
निर्विघ्नं निर्मलं शून्यं सर्वपापमोक्षंकरम् ।
निर्युक्तिरोगशून्यदं सर्वशचुमोक्षंकरम् ॥
अं अः सूक्ष्मवेदानुष्ठान गङ्गा नमः स्वाहा ।
ॐ अः सूक्ष्मचतुःप्रणवामृतानुष्ठानगङ्गायै नमः स्वाहा ।

भट्टारसाधकबुद्ध...भट्टारदिवरूप भट्टार बुद्ध...भट्टार वैरोचन भट्टार शिव...शिवाग्निशक्ति...रुद्र...भट्टाराग्निजय ।

ॐ अः अचिन्त्यनिर्वाणामृतानुष्ठान गङ्गा नमः स्वाहा ।
अं अः अन्नानगङ्गा नमः स्वाहा ।
गणिची महासूक्ष्मं च पविचं महानुक्षणम् ।
सर्वयोगमहामृत सर्वशुचि निर्मल स्वाहा ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

श्रीसाधन महासूक्ष्म सर्वधर्म महाशून्य ।
सर्वमूल महाशून्य सर्वसारि महामृत ॥
नमो बुद्धाय ।
अं अः ॐ अनन्तासनाय नमः ।
ॐ भूर्भुवःस्वर्नमः ।

ॐ तत्पुरुषाय नमः... ॐ फट् पच नमः... ॐ हरगोय नमः... ॐ बं ब्रह्मदेवाय नम... ॐ सं साध्याय नमः ...ॐ भं हृदयाय नमः...ॐ स ब त इ नमः शिवाय
हुं अः ॐ...चिकायमण्डलपरिशुद्ध नमो बुद्धाय
अं अः ॐ स्वभावशुद्ध ।

गङ्गादेवी मामकी...ज्वालामण्डल...प्रतिसर...प्रज्ञा-पारमिता...पृथिवीशरीर...यकार...पूर्वेश्वर...सरस्वती ...नमस्ते भगवन्नग्ने...गिरिपति...श्रीदेवी...परमशिव ...दीर्घाय...स्तम्भमेरु...ततः आर्य...ततः हिजा... गङ्गादेवी...यत् क्षत नकारी...श्वेत वैरोचन...वज्रयन्तु ...अष्टामहाभय... ।

ॐ भट्टारी गङ्गा...ॐ लब्धवरचिन्तामणि ।
ॐ आयुर्वृद्धिर्यशोवृद्धिर्वृद्धिः प्रज्ञासुखश्रियाम् ।
धर्मसन्तानवृद्धिश्च सन्तु ते सुखवृद्धये ॥

उं इन्द्राय विशोधनाय स्वाहा...ॐ जीवमल-विशोधनाय स्वाहा...ॐ अमृताय नमः स्वाहा ।

अङ्गुलीशोधन...ॐ वज्रचित्त चित्तशोधन ॐ अन्योन्यानुगताः सर्वधर्माः अन्योन्यानुप्रविष्टाः सर्वधर्माः ॐ परस्परानुप्रविष्टाः सर्वधर्माः ॐ अत्यन्तानुगताः सर्वधर्माः

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अत्यन्तानुप्रविष्टाः सर्वधर्माः...ॐ नजिजातिकायै ज्योतिःप्रभायै स्वाहा ॐ ग्रे हुं वज्राशये हुं फट् हुं तं हुं ।

शयनं निर्मलं शुद्धं सर्वबुद्धैरधिष्ठितम् ।
नरितं सर्वभावेन बुद्धबोधौ वराप्तये ॥
प्रणम्य सततं बुद्धान् आदिबुद्धनमस्करान् ।
सत्त्वासत्त्ववपुर्व्यक्तान् वक्ष्ये वक्ष्ये धनं परम् ॥
वैरोचनं विभूषणं सकलभवकारणम् ।
आदिनाथं परं दक्षं प्रणमामि तथागतम् ॥
अयं तु सर्वबुद्धाग्रः सिद्धीनां प्रदयस्तथा ।
तथा स्वान्यप्रकुर्वितः मया मण्डलकर्मणा ॥
गुरुपादनमस्कारं गुरुपादुकमेव च ।
परमगुरुपादुके ज्ञानसिद्धिमवाप्नुयात् ॥
अं अः ऊं जिनजित् बुद्धलोचनाय स्वाहा ... ।

नमो भगवत्यै आर्यप्रज्ञापारमितायै अपरिमितगुणायै सर्वतथागतज्ञानपरिपूरायै तद्यथा हं देवशुद्धि म ऊं श्रुतिविजय स्वाहा ॐ भृकुटिपरमसुभगे स्वाहा ।

स्वरव्यञ्जन अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ क ख ग घ ङ प फ ब भ म य र ल व च छ ज झ ज्ञ श स ह त थ द ध न अक्षोभ्य रत्नसम्भव अमिताभ अमोघसिद्धि वैरोचन ।

उष्णीषे वैरोचनको हृद्यायामक्षोभ्यस्तथा ।
गुलुह्यां रत्नसंभवो ललाटे अमितभश्च ॥
मूर्धामोघसिद्धिस्तथा उष्णीष बोधिह तथा ।
धर्म कान्तक्र अनन्य आर्यसङ्घहृद्यायां च ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ॐ सर्वतथागतयोगालङ्कार पूजामेघसमुद्रपारणसमय हुं ॐ अमृतकुण्डलि विघ्नान्तकाय हुं डट् रजोबहुला येन सत्त्वा ते सर्वे बुद्धबोधिसत्त्वा सर्वे बुद्धाः सत्त्वानुरक्ता बुद्धा भवन्तु तेन सत्त्वेन वाक्येन रजो ज्वलंतु। ऊं सर्वतथागतगण्डानुलेप स्वाहा।

श्वेतवर्णा श्वेतपुष्पा श्रीश्री देवि नमोऽस्तु ते।
नीलवर्णा नीलपुष्पा " " " " "।
पीतवर्णा पीतपुष्पा " " " " "।
रक्तवर्णा रक्तपुष्पा " " " " "।

सर्वबुद्धबोधिसत्त्वेभ्यः दशदिगन्तपर्यन्तलोकधातुव्यवस्थितेभ्यः अतीतानागतप्रत्युत्पन्नेभ्यः नमो भगवते श्रीवैरोचनाय तथागताय अर्हते सम्यक्सम्बुद्धाय शाश्वतज्ञानाय शुद्धवर्णाय वज्रपर्यङ्कप्रतिष्ठानाय बोध्यग्रीमुद्रानिबन्धनाय सिंहासनसंस्थिताय सहवतीलोकधातुव्यवस्थिताय सर्वदेवगणपूजिताय सर्वोपद्रवशान्तिकराय नवनवाय क्रुद्धाय सत्त्ववज्रि रत्नवज्रि धर्मवज्रि कर्मवज्र्यादिबोधिसत्त्वपरिवाराय तद्यथा अः ह्रस्से २ शान्ते २ दान्ते २ निराकुले यशोयशोवति तेजस्तेजोवति सर्वतथागतसर्वबोधिसत्त्वाधिष्ठानाधिष्ठिते स्वाहा।

नमो भगवते श्रीअक्षोभ्याय तथागतायार्हते सम्यक्सम्बुद्धाय आदर्शज्ञानाय वज्रपर्यङ्कप्रतिष्ठानाय भूस्पर्शमुद्रानिबन्धनाय कुञ्जरसिंहासनसंस्थिताय अभिरतवतीलोकधातुव्यवस्थिताय यमराजनमक्रोधाय सर्वसत्त्वदुर्दान्तधर्मकराय वज्ररागवज्रसाधुवज्रराजवज्रधरादिबोधिसत्त्व-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

परिवाराय तद्यथा ह्रूं सूक्ष्मे २ शान्ते २ दान्ते २ निराकुले यशोयशोवति तेजस्तेजोवति सर्वतथागतसर्वबोधिसत्त्वाधिष्ठानाधिष्ठिते स्वाहा ।

नमो भगवते श्रीरत्नसम्भवाय तथागतायार्हते सम्यक्सम्बुद्धाय आकाशज्ञानाय पीतवर्णाय वज्रपर्यङ्कप्रतिष्ठानाय वरदमुद्रानिबन्धनाय तुरङ्गसिंहासनसंस्थिताय रत्नवतीलोकधातुव्यवस्थिताय सिंहवाहनमक्रोधाय सर्वसत्त्ववरदपुष्टिकराय वज्रतेजोवज्रकेतुवज्रहासवज्ररत्नादिबोधिसत्त्वपरिवाराय तद्यथा त्रं सूक्ष्मे २ शान्ते २ दान्ते . . . ।

नमो भगवते श्रीअमिताभाय तथा० . . . प्रत्यवेक्षाज्ञानाय रक्तवर्णाय वज्रपर्यङ्कप्रतिष्ठानाय ध्यानमुद्रानिबन्धनाय मयूरसिंहासनसंस्थिताय सुखावतीलोकधातुव्यवस्थिताय मतनमक्रोधाय सर्वसत्त्वानुरागाय वज्रतीक्ष्णवज्रहेतुवज्रभासवज्रधर्मादिबोधिसत्त्वपरिवाराय तद्यथा ह्रीं सूक्ष्मे . . . ।

नमो भगवते श्रीअमोघसिद्धाय तथा० . . . कृत्यानुष्ठानज्ञानाय विश्ववर्णाय वज्रपर्यङ्कप्रतिष्ठानाय अभयमुद्रानिबन्धनाय गरुडसिंहासनसंस्थिताय कुसुमितालोकधातुव्यवस्थिताय वत्सलमक्रोधाय सर्वसत्त्वाभयप्रदाय वज्ररक्षवज्रयक्षवज्रसन्धिवज्रकर्मादिबोधिसत्त्वपरिवाराय तद्यथा अः सूक्ष्मे . . . ।

ॐ ॐ पञ्चमहादेवाय पूर्वदेशाय ईश्वरदेवाय गायत्रीपतये गोवाहनाय सन्ध्यामन्त्राय सर्वपापक्लेशनिर्मलाय नमः स्वाहा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ॐ ॐ पञ्चमहादेवाय पश्चिमदेशाय महादेवदेवाय कुमारीपतये शशवाहनाय [तं]तत्पुरुषमन्त्राय सर्वपाप... ।

ॐ ॐ पञ्चमहादेवाय उत्तरदेशाय विष्णुदेवाय हरसिद्धिपतये गरुडवाहनाय ग्रं ग्रः देवमन्त्राय सर्व०... ।

ॐ ॐ पञ्चमहादेवाय मध्यदेशाय शिवदेवाय उमापतये पिशाचवाहनाय इं इः सनमन्त्राय सर्व० ... ।

श्रीवज्रसत्त्व सत्त्वार्थ सत्त्वेषु करुणात्मक ।
एकात्मनार्यभीमेन जगत्त्रैचि नमोऽस्तु ते ॥
हुंकारसमवस्तव भिदिर महाबल ।
वज्रकाय महोपाय प्रणिपे नमोऽस्तु ते ॥
सर्वलघुपविचाङ्ग मङ्गिष्टिरत्नकुण्डल ।
केतकीपुष्पनःश्रोते आर्यभीम नमोऽस्तु ते ॥
स्थूलाय गुणोत्तुङ्गाय स्थूलदीर्घवपुस्तिर ।
स्थूलवरकर्मस्थाय भीमशक्ते नमोऽस्तु ते ॥
शूरदर द्विषां सङ्गे रणे शत्रुभयङ्कर ।
गदास्त्रेण रिपुभङ्ग भीमशूर नमोऽस्तु ते ॥
साक्षात्सहोदरक्रुद्रा गिरिदेवताजग्रया ।
कलिद्वापरसम्भूत आर्यभीम नमोऽस्तु ते ॥
प्रशस्ते जगतां चातः कल्याणभयदानक ।
विग्रहोष्णम्बहुपत्नो भीम भिक्षणे नमः ॥
अनयदुष्टमुखे तु जगतम परिपका ।
सतकर्मदूसया गत्पह नमोऽस्तु ते ॥
प्रसीद भगवन् भीम मेरवृषब यथागत ।
प्रयोजनमिदं सिध्यात् माद्बचे नमोऽस्तु ते ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नमो बुद्धाय नमो धर्माय नमः सङ्घाय च सण्ड सण्ड।
सत्त्वानां क्लेशबद्धानां मुक्तये वसका तथा।
नमो बुद्धाय गुरवे नमो धर्माय तायिने॥
नमः सङ्घाय महते त्रिभ्योऽपि सततं नमः।
नमस्त्रैलोक्यगुरवे बुद्धाय हितबुद्धये॥
- - - - - - - - पश्यनत् सततं पतम्।
सर्वपापक्षयकरणं एतद्बुद्धानुशासनम्॥

सर्वे सत्त्वाः सर्वे नुतः सर्वे व्रतिनः सुखिनो भवन्तु स्वाहा। यत्पूर्वं बुद्धमूले...( vid. p. 49 )

नमो रत्नत्रयाय नमो बुद्धेभ्यः अतीतानागतप्रत्युत्पन्नेभ्यः नमो अमिताभाय तथागतायार्हते सम्यक्सम्बुद्धाय तद्यथा ॐ मवि २ मेधावि २ अमृतभवे २ बुद्धमति बुद्धभासिते सर्वउल्काज्वालिनि बोधि बोधि महाबोधि महावीरे वेगवति गरुडवज्रवेगवति सर्वबुद्धावलोकिते अः मुनि २ महामुनि स्फय बुद्धधर्मसङ्घादिबलेन नाशय २ विनाशय २ भिन्द मुञ्च २ सर्वयक्षतैन्यसर्वकुम्भाण्डतनो सर्वग्रहण दुष्टचित्तान्यापरपिण्डन्य गृह्ण २ ग्रस २ मारय २ कट्टय २ पच २ हन २ सर्वबुद्धानां बलेन नाशय २ मुञ्च २ विद्रवय २ सर्वयक्षराक्षस यावत् मनुष्यामानुष्यं च बन्धय २ संकोपय २ विक्षाम्प २ स्फोटय २ सर्वमन्त्रन्य सर्वयोगन्य विहन रक्ष रक्ष मां सर्वसत्त्वांश्च सर्वरत्न स्वाहा।

नमो रत्नत्रयाय। नम आर्यावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय महाकारुण्यमित्राय महालोकानुकम्पाय तद्यथा आशीविषनाशिनो दंष्ट्राविष-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नाशिनि जिह्वाविषनाशिनि हालाहलविषनाशिनि ये केचित् सत्त्वा अपदा वा द्विपदा वा त्रिपदा वा चतुष्पदा वा बहुपदा वा जरायुजा वा उपपादुकाः यावत् रूपिणो वा अरूपिणो वा संज्ञिनो वा असंज्ञिनो वाऽपि सत्त्वा नममा वा सर्वरोगप्रशमनि सर्वव्याधिप्रशमनि सर्वविघ्नप्रशमनि सकलकलिकलुषकलहविग्रहविवादवरप्रशमनि तद्यथा ॐ अङ्गे तरङ्गे भरङ्गे २ तरविरे तरवरे तद्यथा ॐ घर घर गिरि गिरि तद्यथा ॐ मुक्ते २ सुविमुक्ते छेदने विच्छेदने मङ्गले विमङ्गले सुसुमुखे रक्ष रक्ष मां सपरिवारं सततयदारं सपौत्रपौत्रिकं सकुलबन्धुवर्गं सर्वसत्त्वांश्च सर्वसत्त्व स्वाहा सर्वभयविमोचने सर्वोपद्रवविमोचने राजभयं मारभयं मरणभयं शास्त्रभयं अस्त्रभयं अग्निभयं उदकभयं चौरभयं स्वचक्रभयं अपरचक्रभयं गौणामध्यगतो वा सिंहमध्यगतो वा गजमध्यगतो वा व्याघ्रमध्यगतो वा गोगवयमध्यगतो वा वैरमध्यगतो वा गिरिदुर्गमध्यगतो वा कृष्णसर्पमध्यगतो वा कान्तारमध्यगतो वा समुद्रमध्यगतो वा आयुर्बन्धनमध्यगतो वा वायुबन्धनमध्यगतो वा प्रमुच्यतां नम भव। नमो आर्यावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय प्रत्यर्थिनः करुण आर्यवीर्यरणे स्वाहा। ॐ जयन्ति विजयन्ति अजिते अपराजिते स्वाहा ॐ जयाय स्वाहा ॐ अपराजिताय स्वाहा। तद्यथा ॐ वज्र २ ॐ विमले अमले अमृतोद्भवे हुं २ फट् २ स्वाहा।

नमो रत्नत्रयाय नमश्चण्डवज्रपाणि महायक्षसेनापति

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नमो भगवते अप्रतिहतबलवीर्य-विदिग्विद्यादरसहस्र-चतुर्भुज-लाक्षतिशरीर असिमुसलपरशुपाशवज्र अग्निज्वाल अतिभीषणकरूप पशुपतिदशाञ्जलविलम्बित-दक्षिणपाद सर्वतियन्तका तव विनिष्ट वामचरण उष्णीष। नमो भगवते महावज्रधर नमो रुद्र नमो हृदयं परमदयारुणं सर्वभूतगणविनयकरं रोषास्त्राशीविषडकरं सर्वकार्य सिद्धिकरं आवर्त्तयिष्यामि तद्यथा भोः २ वज्र २ काल २ कर्म २ कम्प २ बद्ध २ मर्द २ हहा हिहि हुं तुं रौद्रातिरौद्रानुसारिणं इमि दंष्ट्राग्रचन्द्रग्रह मयि दुष्टचित्तं प्रविनाशय रौद्ररूपं प्रविनाशय रौद्रवज्रेण प्रविनाशय विष्णुं प्रविनाशय ब्रह्माणं प्रविनाशय सर्वरोगान् प्रविनाशय सर्वापदं प्रविनाशय सर्वक्लेशान् प्रविनाशय सर्वदुष्टचित्तान् प्रविनाशय सर्वविघ्नान् प्रविनाशय सर्वनयान् प्रविनाशय सकलकलिकलुषकलहविग्रहविवादान् प्रविनाशय देवासुरगरुडगन्धर्वकिन्नरमहोरगादीन् प्रविनाशय चातय २ कम्पय २ बन्धय २ मर्दय २ चण्ड २ मर २ दय २ कुरु २ महाबल २ महावीर्य २ महादीप्त महातेजः महारौद्र महाशासनतुरु २ दर २ वर २ स्मवर २ स्वभवन्त २ भवानि के हुं फट् स्वाहा ॐ सूक्ष्मतीर्थाय नमः स्वाहा...ॐ सर्वतथागतपादवन्दनं करोमि। ॐ सर्वतथागतार्यगुरुपादवन्दनं करोमि नैवेद्यं सर्वसंयुक्तं अद्य भोज्यं समानीत्य सर्वगन्धरक्षोपेतं ददामि। प्रतिगृह्यताम्। ॐ अकारो मुखं सर्वधर्माणां आद्यनुत्पन्नत्वात् ॐ वज्रास्फारणकं ॐ वज्रनैवेद्यं हुं फट्......।

6

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रत्नत्रयं मे शरणं सर्वं प्रतिदिशाम्यहम् ।
अनुमोदे जगत्पुण्यं बुद्धबोधौ दधे मनः ॥
उत्पादयामि वरबोधिचित्तं
निमन्त्रयामि बहुसर्वसत्त्वान् ।
इष्टां चरिष्ये वरबोधिचारिकां
बुद्धो भवेयं जगतो हिताय ॥
उत्पादयामि परमं बोधिचित्तमनुत्तरम् ।
यथा चैयध्वका नाथाः सम्बोधौ कृतनिश्चयाः ॥
त्रिविधां शीलशिक्षां च कुशलधर्मसङ्ग्रहम् ।
सत्त्वार्थक्रियाशीलं च प्रतिगृह्णाम्यहं दृढम् ।
बुद्धं धर्मं च सङ्घं च त्रिरत्नाग्रमनुत्तरम् ॥
अद्याग्रेण ग्रहिष्यामि संवरं बुद्धयोगजम् ।
वज्रघण्टां च मुद्रां च प्रतिगृह्णामि तत्त्वतः ॥
अद्याग्रात्तं ग्रहिष्यामि महावज्रकुलोच्चये ।
चतुर्दानं प्रदास्यामि सत्कृतं तु दिने दिने ॥
महारत्नशुद्धे योगे समये च मनोरमे ।
सद्धर्मं प्रतिगृह्णामि बाह्यं गुह्यं त्रियानिकम् ॥
महापद्मकुले शुद्धे महाबोधिसमुद्भवे ।
संवरं सर्वसंयुक्तं प्रतिगृह्णामि तत्त्वतः ॥
पूजाकर्म यथाशक्त्या महावज्रकुलोच्चये ।
उत्पादयामि परमं बोधिचित्तमनुत्तरम् ॥
गृहीतं संवरं कृत्स्नं सर्वसततकारणम् ॥
अतीर्णान् तारयिष्यामि अमुक्तान् मोचयाम्यहम् ।
अनाथान्नाथयिष्यामि स्थापयिष्यामि निर्वृतौ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ब्रह्मविष्णवीश्वरा ज्ञेया अकाराक्षरमूर्त्तिजाः ।
महादेवोऽर्धचन्द्रश्च बिन्दुश्चैव सदाशिवः ॥
नादमूले स्थितो देवः शून्यश्च परमः शिवः ।
मध्ये शिवपरं शून्यं नादान्ते चापि शून्यकः ॥
श्रीशून्यं मेऽर्धचन्द्रोऽस्ति बिन्दुः शून्यात्मदेवकः ।
श्रीनादो महाभैरवः अर्थव्यञ्जनरक्षकः ॥
ॐ ॐ वज्रपति शिरोःमेय वक्त्रे चापि पितामहाः ।
महते हृदये तथा पिता गुह्ये तथैव च ॥
माता तिष्ठेत्कराग्रे च सुता वामकरे स्थिताः ।
पुत्रा दक्षिणपादे च वामपादे प्रपौत्रकाः ॥
ओङ्काराद्यान्तसलुद्रं अङ्कारेण विदर्शनम् ।
तर्पणं सर्वपूजनं प्रसीदन्तु नमः स्वाहा ॥

ॐ अनन्तशयनाय नमः सिंहासनाय नमः देवासनाय नमः पद्मासनाय नमः देवपितृप्रतिष्ठायै नमः स्वाहा ।

ॐ ॐ पितृभ्यश्च मातृभ्यश्च नमः स्वाहा ॐ ॐ प्रजापतये नमः स्वाहा । ॐ पितामहेभ्यः स्वाहा ॐ मातामहेभ्यः स्वाहा । ॐ प्रपितामहेभ्यः स्वाहा । ॐ प्रमातामहेभ्यः स्वाहा । ॐ आकाशमरलावय हुं ।

निर्वाणा पितरश्चैव निर्वाणा च पितामहाः ।
निर्वाणा महादेवता - - - - - ॥

तोष्यन्तु लेप्यन्तु पुष्यन्तु तिष्ठन्तु जिघ्रन्तु भोज्यन्तु तृप्यन्तु शम्यन्तु ।

ॐ सोमपानं च विप्राणां क्षत्रियाणां च विर्भुज ।
वैश्यानां मद्यपानं च शूद्राणां तु सुखर्थिनाम् ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नमः स्वाहा......तोष्यन्तु तिष्ठन्तु भुञ्यन्तु सुकान्तु
गच्छन्तु मूर्च्छन्तु स्वर्गन्तु मोक्षन्तु लेप्यन्तु शम्यन्तु ।
तोष्यन्तु पितरो देवा तोष्यन्तु पितरो गणं ।
तोष्यन्तु पितरः सर्वे तोष्यन्तु पितरो नमः स्वाहा ॥
लेप्यन्तु...
पुष्यन्तु...
तिष्ठन्तु...
जिघ्रन्तु...
तिगन्तु...
भोज्यन्तु...
तृप्यन्तु...
शम्यन्तु...
ॐ अं मद्यपेभ्यः सोमपेभ्यो नमः स्वाहा ।

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# Sanskrit Texts from Bali

## IV.

1. कारकसंग्रह ।
2. चरित्र रामायण ।
3. The Sanskrit part of bilingual exercises.
4. नैष्ठिकज्ञान ।
5. दशशील ।
6. Initial Sanskrit stanzas at the beginning of works written in old-Javanese.
   (1) Agastyaparvan;
   (2) Mahābhārata;
   (Ādi, Virāṭa, Bhīṣma, Āśramavāsa).

P. P. Ac. Gunratnasuri M.S.		Jin Gun Aaradhak Trust

# कारकसंग्रहः ।

अविघ्नमस्तु ।

अस्तु शंसा नमस्यतु शङ्कराय महात्मने ।
तथा वकाभ्यां देवाभ्यां सर्वदेवेभ्य एव च ॥
अप्रशस्तं प्रशस्तं वा तदेकैकेन वर्ण्यते ।
कवीन्द्रस्य गीतिर्ज्ञेया तस्माद्यत्नेन नीयते ॥
कर्म कर्त्ता तयोर्योगं यो वेत्ति स विचक्षणः ।
यत्कृतं कर्म तत् प्रोक्तं स कर्त्ता यः करोति वा ॥
तृतीया प्रथमा षष्ठी तिस्रः कर्तृत्वजातयः ।
पञ्चमी सप्तमी ताभ्यां ऋते तत् कर्म शब्द्यते ॥
सद्वितीया तृतीया च पञ्चमी षष्ठिका तथा ।
विभक्तयश्चतस्रस्ताः करणं सम्प्रकाशिताः ॥
तृतीयका चतुर्थी च षष्ठी तिस्रो विभक्तयः ।
सम्प्रदाने समुद्दिष्टास्त्वपदानेऽपि पञ्चमी ॥
विभक्ती द्वेऽधिकरणं षष्ठिका सप्तमी तथा ।
तत्सर्वं युक्तितश्चिन्त्यं शेषे षष्ठी तु मन्यते ॥
आदिका प्रथमी तज्ज्ञैः प्रोच्यते कर्तृकर्मणोः ।
सीत सुग्रीव तच्छ्राव्यं कविना क्रियते मतिः ॥
स्वयमेवापि वर्तेत कर्मकर्तेति मन्यते ।
यथा लक्ष्मणं विद्धि त्वं वृक्षस्तिष्ठति कानने ॥
द्वितीया कृत्यमुद्दिष्टं कर्म वा करणाश्रयः ।
वेत्ति विद्यां नरो बोधिं अध्वगो याति गां प्रति ॥
कर्तृत्वं सहयोग्यं च करणं देशकालयोः ।
विशेषणं च हेत्वर्थं सूचितं गे तृतीयकम् ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

शूरेण सह मित्रेण हन्यतेऽरिर्वरे रणे।
नत्मङ्गजं नोः चे स्वत्वें नाचा विनात्मना॥
भूयस्तृतीयका ज्ञेया सम्प्रदानं च कर्मणि।
साधुनां न ददौ दानं भूतेन च-कारकः॥
सम्प्रदानं तदर्थं च चतुर्थी कर्मणि स्मृता।
कामिने रतये नारी ददौ फलेय कामिनी॥
अपदानं च करणं देशं हेतोस्तु पञ्चमी।
रोध्यं दसे मृधा चौर्यं राज्ञा शत्रुर्निवार्यते॥
शेषाधिकरणं देशं सम्प्रदाने च कर्मणि।
निर्धारणं च करणे हेतौ कर्तरि षष्ठिका॥
किनुरसि सतो न्तस्य धातु रतिनः रेवगोः।
आत्मेस्ति सङ्गवेमदोस इदं साध्यस्य सत्कृते॥
भवेऽधिकरणं काले देशे निर्धारण यथा।
सुप्ता नार्यां गृहे रात्रौ प्रदेशे नृषु न स्वपेत्॥
प्रज्ञा न संदिग्धा नृणां सुबुद्धिनामधीत्य तत्।

अभ्रान्तिमिज्याय विद्यां तस्मात्तदिदं कारकसंग्रहाख्यं महानोधीते स्वनिबोधनाय।

End of the work in the manuscript shown at Tabanan.

परात्मतत्त्वं संयुज्य युक्तितश्चिन्त्यमात्मसात्।
प्रमाणीकृत्य वाक्यानि गुरूक्तानि मनीषिणाम्॥
कातन्त्रं च महातन्त्रं दृष्ट्वा तेन उवाच —।
बालावबोध[न]ार्थाय कृतः कारकसंग्रहः॥

इति समासः समाप्तः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# चरित्र रामायण।

(कवि जानकी)

रामलक्ष्मणौ भ्रातरौ नमस्कृत्वा सितासितौ ।
वने तस्मिन् विचरन्तौ सीतां च जनकात्मजाम् ॥
धन्यं माङ्गल्यमायुष्यमलक्ष्मीकलिनाशनम् ।
रामायणं प्रवक्ष्यामि मातृकाक्षरयोजितम् ॥
अयोध्याधिपतेः पुत्राश्चत्वारः सूर्यवर्चसः ।
रामलक्ष्मणशत्रुघ्ना भरतश्च महाबलः ॥
आचारविनयोपेताः सत्यसन्धा दृढव्रताः ।
शूराश्च सत्यप्रतिज्ञाः सर्वे दशरथात्मजाः ॥
... ... कैकेय्या स्वपुत्रहितकाम्यया ।
दृढव्रतो राज्ञ इष्टो रामः सम्प्रस्थितो वनम् ॥
ईहितेनाभिषेकेन रामः सम्प्रस्थितो वनम् ।
सीता चानुगता साध्वी लक्ष्मणश्च महाबलः ॥
उपवासपरो रामस्तपस्वी दण्डके वने ।
सभार्यः सभ्रातृकश्च ... ... ... ॥
तत्र पराभवकालो राक्षसानामुपस्थितः ।
ऊनस्[तु] रामवीर्येण रावणो नाम राक्षसः ॥
तेन दुष्टात्मना सीता छलेनापहृता वने ।
रिक्तधर्मसमायुक्तं मारीचं नाम मातुलम् ॥
आगम्य रावणः पापस्ततस्तद्वाक्यमब्रवीत् ।
दशरथात्मजं हत्वा रामं तत्र करं... ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

लोम्ना काञ्चनरूपेण मृगो भूत्वा तदा [हि] सः।
लोभयित्वा तां वैदेहीं व्यहरद्दण्डके वने॥
सीतां कमलपत्राक्षीमुपासीनां वने तदा।
हृत्वा रावण...उपागमन्नभस्तलम्॥
एतस्मिन्नन्तरे गृध्रो जटायुर्नाम धार्मिकः।
ताभ्यां [तेन] समाख्यातं सीतायाः परिमार्गणे॥
ऐश्वर्यमदमत्तेन रावणेन खगाधिपम्।
... ... सीता लङ्कां प्रवेशिता॥
ओघशोकनिमग्नः स सीतावत्सलराघवः।
कपिना हीनराज्येन सुग्रीवेण समागतः॥
औषधं परमं प्राप्तः सुग्रीवो रामदर्शनात्।
[हत्वा] च वालिनं रामः सुग्रीवमभ्यषेचयत्॥
सत्यसन्धं दृढव्रतं हनुमन्तं महाकपिम्।
सुग्रीवः प्रेषयामास सीतायाः परिमार्गणे॥
हनुमान् वानरश्रेष्ठः ... कृतनिश्चयः।
करेयः कपिभिः सार्धं भ्रमाणा दक्षिणां दिशम्॥
अलभन्तश्च वैदेहीं चक्रुः प्रायोपवेशनम्।
खगस्तु सिद्धकार्यवान् सम्पातो नाम धार्मिकः।
तेन तेषां समाख्यातं सीतायाः परिमार्गणे॥
गत्वा पारं समुद्रस्य वेगेन गरुडा यथा।
दृष्ट्वा नगरीं च लङ्कां सीतां च जनकात्मजाम्॥
घनेऽशोकवने देशे समागम्य स मैथिलीम्।
हनुमान् लब्धसंदेशो राक्षसान् विन्यसूदयत्॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

डकारसदृशं हृत्वा ललाटे भ्रुकुटिं तथा ।
क्रुद्धेनेन्द्रजिता धीरो गृहीतो हनुमान् कपिः ॥
चन्द्रमण्डलसङ्काशं लाङ्गुलं तस्य राक्षसाः ।
शुक्लैरावेष्टितं वस्त्रैस् तैलाभ्यङ्गमदीपयन् ॥
चलयित्वा ततः सर्वान् राक्षसान् विपुलो हरिः ।
लाङ्गुलेन प्रदीप्तेन लङ्कामदीपयत्पुरम् ॥
जलमध्ये स निर्वाप्य लाङ्गुलं प्लवगेश्वरः ।
कृतभयं पुरं दग्ध्वा पुनरागमनोत्सुकः ॥
ऋषालयं स्तुत्यामेत्य हरिरुत्तम आगतः ।
सिद्धकार्योऽतित्वरितः प्रदेशं यत्र राघवः ॥
अकारवदनो भूत्वा हनुमान् स हरीश्वरः ।
न्यवेदयदशेषेण राघवाय महात्मने ॥
तकारसदृशं धनुः ... ... रघुनन्दनः ।
गृहीत्वा प्रस्थितस्तूर्णं सीतायाः ... ॥
तकाराकारनेत्राणां हरीणामयुतव्रताः ।
सुग्रीवस्याग्रतो यान्ति प्रीताः कर्तव्यलालसाः ॥
डयन्त इव वेगेन गत्वा पारं महोदधेः ।
राघवः शरमुद्यम्य पश्चात्तवोमयाचक ॥
तकारसदृशीं कृत्वा ललाटे भ्रुकुटिं तदा ।
हनुमानग्रतो याति राघवस्य हिते रतः ॥
नकारसदृशैः पद्मैः प्राञ्जलिः प्रत्युपस्थितः ।
उवाच सागरो रामं सेतुं मम जले कुरु ॥
तस्य तद्वचनं श्रुत्वा सुग्रीवो नलमब्रवीत् ।
नल तं भद्र [कुरुष्व] सेतुं तत्र महार्णवे ॥

P. P. Ac. Gunratnasuri M.S.                    Jin Gun Aaradhak Trust

स्थूलं मृष्टोपमं दिव्यं विश्वकर्मसुतो नलः ।
चकार सेतुं धर्मात्मा सागरे मकरालये ॥
दशयोजनविस्तीर्णमायतं शतयोजनम् ।
येन सवानर ... समुत्पत्य महोदधिम् ॥
धनुर्वीर्यं समाश्रित्य राघवः सह वानरैः ।
राक्षसान् योधयामास क्रोधसंरक्तलोचनः ॥
नगर्यां मोतयुद्धायां रावणः सह राक्षसैः ।
ततो द्वाराद्विनिष्क्रम्य चकार योधनं महत् ॥
पनसः शरभो मैन्दो नीलो मारुतिरङ्गदः ।
नानावृक्षैः शिलाभिश्च राक्षसान् विन्यसूदयन् ॥
फलितैः पादपैः कूले रोषिभिः शक्तितोमरैः ।
राक्षसाः खण्डनं चक्रुर्वानराणां चमूमुखे ॥
बलवान् राघवः श्रीमान् दशग्रीवं जघान सः ।
निहतं रावणं दृष्ट्वा विभीषणमथाब्रवीत् ॥
भक्तोऽसि मयि रक्षेन्द्र धार्मिकश्चापि सुव्रतः ।
अराक्षसमिदं कर्म कृतं तुष्टोऽस्मि ते विभो ॥
मया दत्तं राज्यमिदं भुङ्क्ष्व पुलस्त्यनन्दन ।
सपुत्रभृत्यानुचरो भुङ्क्ष्व राज्यमकण्टकम् ॥
यदर्थमयमारम्भः कृतो मे राक्षसेश्वर ।
तमहं द्रष्टुमिच्छामि गच्छ त्वं सहलक्ष्मणः ॥
रक्तः प्रियहिते युक्तः सलक्ष्मणो विभीषणः ।
प्रविश्य नगरीं लङ्कां ददर्श जनकात्मजाम् ॥
आरोचयच्च वैदेहीं काकुत्स्थाय महात्मने ।
कृशां विवर्णां मलिनां दर्शयामास सुप्रियाम् ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वरारोहां तदा दृष्ट्वा रामश्चिन्तासमन्वितः ।
अग्नौ विशुद्धिमादाय पुष्पकेन ययौ ततः ॥
शत्रून् हत्वाऽतिवेगेन ... आगम्य राघवः ।
नन्दिग्रामे ... भरतं मित्रवत्सलम् ॥
सदाराचौमित्रः[सौमित्रः?] सिमान् राघवः सह सीतया।
सङ्गतो भ्रातृभिः सदा मातृभिः स समागतः ॥
समेत्य हृष्टहृदयः पौरजानपदैः सह ।
गवां शतसहस्राणि ब्राह्मणेभ्यः प्रदत्तवान् ॥
आत्तशत्रुमहेन्द्राणिः शतक्रतुरिवापरः ।
शतं वर्षसहस्राणां रामो राज्यमवासयत् ॥

# चरित्र रामायण ।

विटपोचिताय विटपेन उचित विटपः ... ... उचित ... तेन वृक्षेण ... पर्णेन विटपोचितशाखिना ... ... ते याचकाः सङ्गपात्रा ··· आक्रत्यन्ते ... पुमान् दाता ... दातुं तच्छीलः ... ... तेन पुंसा दात्रा ते आलयाः ... ... हृष्टः ते आलयाः हृष्टाः प्रहृयन्ति ... ··· सः वृक्षः ... स्तवकेन आढ्यः ... ... गन्धवत्या गन्धं वहति ... गन्धः ... वहति ... तस्मै वृक्षाय स्तवकाद्याढ्याय गन्धवाहिने ।

... ... ते जनाः ... हृष्टाः ... प्रहृयन्ति ... सः विद्वान् ... तस्मै विदुषे ... सः त्वं ... तं पञ्जरमानय ... सः वृक्षः ... भ्रमर-संगीतः ... भ्रमरैः संगीतः ... ... लताश्लिष्टः ... लतया श्लिष्टः ... सुपुष्पितः ... तस्मात् वृक्षात् लताश्लिष्टात् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

... सः दूतः ... सः नृपः ... तस्मात् नृपात् ... सः वृक्षः सर्पजुष्टः ... हृद्यः ... ते अन्ये भृतस्वनाः ... तस्य वृक्षस्य हृद्यस्य ताः शाखाः पुष्पेन उज्ज्वलाः ... पुष्पोज्ज्वलाः ... सः राजा ... तस्य राज्ञः ताः नार्यः ... उज्ज्वलाः सः कलिः ... सः वृक्षस्तिष्ठति ... कुसुमितः ... तस्मिन् वृक्षे कुसुमिते ... सः कोकिलस्वनः कोकिलस्य स्वनः ... तं कोकिलस्वनम् सः कलि श्रुत्वा मूर्च्छितः ... सः नरः ... रागी ... रागस्तस्य अस्ति ... अलाबुवीणायुक्तः अलाबुश्च वीणा चेति ... तस्याः अलाबुवीणायाः स स्वनः ... तं स्वनं सः नरः श्रुत्वा ... मूर्च्छितः ... सः नरः रागी श्रुत्वा मूर्च्छितः ।

हे वृक्ष ... सः त्वं तिष्ठ ... सः अहं ... वियोगी ... वियोगः तस्य अस्ति ... तस्य मम वियोगिनः सा उत्कण्ठा ... तां उत्कण्ठां सः त्वं अकार्षीः ... इदं कान्तारं ... अस्मिन् कान्तारे ... ते किरणाः ... तैः किरणैः ।

सा कान्ता ... पीनस्तनश्रोणि पीनें स्तनश्रोण्यौ तयोः स्तनश्च श्रोणिश्च ... रूपयुक्तायाः ... विलासिन्याः विलासः तस्याः अस्ति ... ते नराः ... तेषां नृणां तत् मनः ... सा कान्ता पीनस्तनश्रोणी रूपयुक्ता विलासिनी हरति ... अयं लोकः ।

सा रम्भा ... ते मरुतः ... तेषां मरुतां तत् मनः सा रम्भा हरति ... सः द्यौः ... दिवि ... ।०

सः नरः ... सा कान्ता ... गुणवत्या ... गुणः अस्ति ... साध्वी ... शशिवक्त्राय शशिः इव वक्त्रं तस्याः ... मनोहरम्

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

... तां कान्तां गुणवतीं साध्वीं शशिवक्त्रां मनोहरां सः नरः लब्ध्वा प्रहृष्टः।

... सः वासवः ... सा अहल्या ... तां अहल्यां सः वासवः लब्ध्वा ... प्रहृष्टः।

... सः नरः ... सेव्यमानः ... सा कान्ता ... साभरणा आभरणेन सह ... शीलाधारानुयुक्ता शीलं च आचारश्च ... तया कान्तया साभरणया शीलाचारानुयुक्तया सः नरः सेव्यमानः।

सः पुरुषः कामी कामः तस्या अस्ति ... तत् कुसुमं सः पुरुषः कामी ददाति ... सा कान्ता ... स्मितवक्त्रा स्मितयुक्तं ... वक्त्रं तस्याः ... वक्त्रं स्मितयुक्तं स्मितेन युक्तं ... मनोहरवपुःश्रियः मनोहरं वपुः सश्री तस्या अस्ति।

... सः अर्जुनः ... तत् कुसुमं सः अर्जुनः ददाति ... सा सुभद्रा तस्यै सुभद्रायै ...।

सः पुरुषः ... व्यासः यथा ... कामं बन्धति ... सः पुरुषः व्यासः यथा बिभेति ... सा कान्ता प्रियवादिनी प्रियं वचनं वदति ... रूपं तस्याः अस्ति ... भ्रूः तस्याः ... चलति ... तस्याः कान्तायाः प्रियवादिन्याः रूपवत्याः चलभ्रुवः।

सः नरः ... सा कान्ता ... भ्रूविलासिनी ... तस्याः अस्ति भ्रूविलासः भ्रुवः विलासः ... तस्याः कान्तायाः भ्रूविलासिन्याः द्वन्द्वतारहितायाः द्वन्द्वता द्वन्द्वं तस्य भावः।

... सः पुरुषः ... मीनारिः मीनानामरिः ... शूर्पेण युक्तः ... सा कुमुद्वती ... तस्याः कुमुद्वत्याः द्वन्द्वतारहितः ... सः

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पुरुषः मौनारिः शूर्प[युक्तः] द्वन्द्वतारहितः म्रियते च ... सः पुरुषः ... कामुकः ... तत् वचः ... सा कान्ता ... बहुवाक्यानि तया वा बहुवाक्यानि तस्याः वाक्यानि ... तस्यां कान्तायां बहुवाक्यायां ......। ... सः रावणः ... तस्य रावणस्य तत् वचः तिष्ठति ... सा सीता ... तस्यां सीतायाम्।

हे कान्ते हे ललितलावण्या त्वं ललितं च लावण्यं चेति सः अहं तया त्वया सह ... तत् समागतम् ... लब्ध्वा सः अहं हृष्टः अस्मि ......। ... सः भीमरथः ... तत् समागतम् ... सा कुरङ्गी ... तया कुरङ्ग्या सह ... लब्ध्वा ... हृष्टः।

सः अग्निः ... वातचलधूमः तस्य धूमः वातचलः वातेन चलः ... भास्कर ... भासं करोति ... तत्तिमिरं सः अग्निः वातचलधूमः भास्करः हन्ति। सः मुनिः ... जातः ... तत् मातृपार्श्वं ... तस्मात् मातृपार्श्वात् ... सः मुनिः जातः ... तानि मन्वन्तराणि ... मनूनां ... मनवः ... अन्तराणि।

ते द्विजाः ... सेव्याः ... सः अग्निः ... शुष्केन्धनासक्तः ... इन्धनं ... शुष्कं ... दीप्तं ... यज्ञक्रियार्पितः ... यज्ञक्रिया ... यज्ञस्य क्रिया ... अर्पितः ... तं अग्निं शुष्केन्धनासक्तं दीप्तं यज्ञक्रियार्पितं ते द्विजाः सेव्याः परियन्ति।

ते स्वकिरणाः ... सः रविः ... तं रविं ते स्वकिरणाः परियन्ति ... ते मृगाः ... प्रतप्यन्ते ... सः अग्निः ... घृतेन सिक्तः ... घृतं ... सिक्तः ... ज्वलितः ... स्फुलिङ्गी स्फुलिङ्गः

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तस्य अस्ति ... स्फुलिङ्गः ... तेन अग्निना घृतसिक्तेन ज्वलितेन स्फुलिङ्गिना ... तं द्रवं ... तस्मिन् द्रवे ... ।

ते भगाः ... प्रतप्यन्ते ... सः अरिः ... तेन अरिणा सः रणः ... तस्मिन् रणे ... इन्धनं ... दातव्यम् ... सः द्विजः ... सः अग्निः ... मन्दभासः ... तस्मै अग्नये मन्दभासाय ...... तत् इन्धनं दातव्यम् ।

... तत् तोयम् ... दातव्यम् ... सः शक्रः ... तेन शक्रेण ... सः उदधिः ... बडवामुखी बडवामुखं तस्मिन् अस्ति बडवामुखम् ... बडवानलः तस्मिन् अस्ति ... तस्मिन् उदये [sic, corr. उदधौ] बडवामुखिके ... तत्तोयं दातव्यम् ।

ते स्फुलिङ्गाः ... सः द्यौः ... तं दिवं ते स्फुलिङ्गाः उन्नताः ... सः अग्निः ... उन्नीर्णधूमौघः ... तस्य धूमः ... ओघः ... उन्नीर्णः ... तस्मात् अग्नेः उन्नीर्णधूमौघात् ... ते स्फुलिङ्गाः उन्नताः ।

ते पक्षिणः ... सः द्यौः ... तं देवं ते पक्षिणः उन्नताः ... सः हिमाद्रिः ... दीप्तशिखरः दीप्तं शिखरं तस्य ... तस्मात् हिमाद्रेः दीप्तशिखरात् ... ते पक्षिणः उन्नताः ।

सः अग्निः ... ज्वालामालाकुलद्युतिः ... ज्वालामालाकुलद्युतिः तस्य द्युतिः ... ज्वालामालाकुल ... ज्वाला ... माला ... आकुल ... तस्य अग्नेः ज्वालामालाकुलद्युतेः ते धूमाः ... चण्डानिलोद्भूताः ... चण्डश्च सः अनिलश्चेति । अनिलः ... उद्भूतः ... सा क्षितिः ... तस्याः क्षितेः ... वितानानि ... ते धूमाः चण्डानिलोद्भूताः वितानानि इव विभान्ति ... तत् गगनं ... तस्मिन् गगने ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ते शलभाः ... रूपलोलुपाः रूपं ... लोलुपाः ... ते पक्षाः तान् पक्षान् ते शलभाः वितत्य ... सः अग्निः ... भास्कर-दीप्ताभाः भास्करदीप्तेन सा आभा भास्करदीप्तं भास्करस्य दीप्तं ... भास्कर ... दीप्तं ... सह ... आभा ... तस्मिन् अग्नौ भास्करदीप्ताभे ... सः अग्निः ... ते शलभाः रूपलोलुपाः वितत्य नश्यन्ति । ते पुरुषाः ... दीनाः ... ते पक्षाः ... तान् पक्षान् ते पुरुषाः वितत्य ... सः दानपतिः ... तस्मिन् दानपतौ ते पुरुषाः दीनाः नश्यन्ति ।

सः अग्निः ... स्वपितः(?) ... सः वर्तकापोतकः ... वर्तकः ... पोतकः ... तेन वर्तकापोतकेन ... हे अग्ने ... सः त्वं ... तिष्ठ ... सः अहं ... तस्य मे ... सः पिता गतः जङ्गमः अस्ति ... अद्यकाले ... सः अग्निः स्वपितः स्थितः भवेत् अद्य एव ।

सा नदी ... वातोद्धता ... वातोद्धतं जलं तस्य ... वातोद्धतं वातेन उद्धतं ... वातः ... उद्धतं ... द्रुतवेगोर्मिसंकुला ... द्रुतवेगश्च सः ऊर्मिश्च ... सा नदी वातोद्धतजला द्रुत-वेगोर्मिसंकुला गच्छति ।

... सा नारी ... अश्रान्ता ... सः पतिः ... कुशलः ... तं पतिं कुशलं सा नारी अश्रान्ता गच्छति ।

ते हंसाः ... संहृष्टाः ... सा नदी ... रम्यतटाभोगा ... रम्यः तटाभोगः तस्य ... तटे आभोगः ... तटं ... आभोगः ... दृश्यान्तर्जलमीना ... दृश्यः अन्तर्जलमीनः तस्य अन्तर्जल-मीनः अन्तर्जलं ... मीनः ... तां नदीं रम्यतटाभोगां दृश्यान्तर्जलमीनां ते हंसाः संहृष्टाः चरन्ति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ते सत्वमन्तः (?) संहृष्टाः ... सः मुनिः ... तं मुनिं ते सत्वमन्तः (?) संहृष्टाः चरन्ति ... सः वेसुः (?) ... आक्षिप्यन्ते ... सा नदी ... अम्बुदोदरजलपूर्णा ... अम्बुदोदरजलं अम्बुदोदरस्य जलं अम्बुदोदरं अम्बुदस्य उदरं अम्बुदः ... उदरं ... शीतफेन (?) शीतः फेनः तस्य ... सेनः ... शीतः ... अम्बुदोदरजलपूर्णा शीतफेना ... तैः वेगैः ।

सः पुरुषः ... कामुकः ... आक्षिप्यते ... सः दूतः ... तथा दूत्या ... तानि वाक्यानि ... तैः वाक्यैः ... ।

सः नरः ... शुचिः ... सः नरः शुचिः रोचते ... सा नदी ... पुलिनसंचया पुलिनं ... संचयति पुलिनसंचय ... तोयौघः तोयानां ओघः ... तोयानि ... ओघः ... तस्याः नद्याः ... पुलिनं ... संचयैः ... ।

सः कविः ... रोचते सा सरस्वती तस्यै सरस्वत्यै ... ते जनाः ... ते जनाः विरमन्ति ... सा नदी चलन्महावीची चलत् ... महत् ... वीची तस्याः ... वीची चलति च महती च ... तस्याः नद्याः चलन्महत् ... वीच्याः गम्भीरायाः ।

ते तापसाः ... विरमन्ति ... सा तरुणी ... तस्याः तरुण्याः ... सा नदी ... सलिलपूर्णा सलिलेन पूर्णा ... तत् तीरद्वयं तीरे तीरं च तीरं च ... द्वयं ... दृष्टं ... सः पुरुषः ... कामी ... कामः तस्य अस्ति । कामः ... तेन पुरुषेण कामिना तत् तीरद्वयं शुभं दृष्टं भाति ।

सा कान्ता ... तस्याः कान्तायाः तत् ऊरुद्वयं शुभं दृष्टं भाति ... ।

सः नरः ... पतन् ... सा नदी ... त्वरितवेगा ... त्वरितः

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वेगः तस्य ... त्वरितः ... तस्यां नद्यां त्वरितवेगायां ... दृष्टः ... सः पुरुषः ... कश्चित् ... तेन पुरुषेण केनचित् ... मृतः ... स नरः पतन् दृष्टः मृतः ... ।

सः बकः ... पतन् ... तस्यां भागीरथ्यां ... सः पुरुषः ... कश्चित् ... तेन पुरुषेण ... मृतः ... सः बकः पतन् दृष्टः ।

हे नदि ... शीताच्छातोयाढ्ये ... शीताच्छातोयं ... तोयं ... शीताच्छं ... शीतं च अच्छं च ... आढ्य ... सा त्वम् ... हे कुमुदोत्पलमण्डिते कुमुदोत्पलमण्डिता कुमुदोत्पलाभ्यां मण्डिता कुमुदोत्पले कुमुदं च उत्पलं च ... कुमुद ... उत्पल ... मण्डित ... ते सत्त्वौघाः सत्त्व ... सत्त्वौघः ... तान् सत्त्वौघान् प्रह्लादयसि ।

सा द्रौपदी ... ते पाण्डवाः ... तान् पाण्डवान् सा द्रौपदी प्रह्लादयति ।

ते हयगजरथाः हयश्च गजश्च रथश्च ... सः पुरुषः ... तं पुरुषं ते हयगजरथाः निवर्तयन्ति ... सः मृत्युः तस्मात् मृत्योः ... सः लोकः ... इह लोके ... ते मन्त्रिमुख्याः ... मन्त्रि ... मुख्य ... सः पुरुषः ... तं पुरुषं ... ते मन्त्रिमुख्याः निवर्तयन्ति ... ताः हिरण्यकोट्यः ... हिरण्यानां कोट्यः हिरण्यानि ... कोट्यः ... हिमवत्प्रतिमाः ... हिमवान् इव प्रतिमाः हिमवान् ... इव ... प्रतिमा ... सः पुरुषः ... तं पुरुषं ताः हिरण्यकोट्यः हिमवत्प्रतिमाः निवर्तयन्ति ... सः मृत्युः ... तस्मात् मृत्योः ... सः लोकः ... इह लोके ... भगवान् कमलदलाक्षः त्वं कमलदलमिव अक्षि तस्य अक्षि ... कमलदलमिव कमलस्य दलं ... कमलं ... दलं ... सः त्वं ... सः

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आत्मा ... तस्य आत्मनः तानि प्रियानि सः त्वं तानि प्रियाणि सः त्वं चर ...।

ते नराः ... तेषां नराणां तत् भयं ... तत् मरणं ... महत् ... तत् भयं महत् ... अपि च ... तत् मरणं ... सेवितव्यं ... सः पुरुषः ... तेन पुरुषेण ... सः कालवातः ... तत् मरणं ... सः जीवलोकः ... तस्मिन् जीवलोके ... हे कमलदलाक्ष ।

